International Journal of Sanskrit Research 2020; 6(1): 195-199

International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2020; 6(1): 195-199
© 2020 IJSR
www.anantaajournal.com
Received: 11-11-2019
Accepted: 15-12-2019

**डा. दयानन्दपाणिग्राही**
सहायकाचार्यः, अद्वैतवेदान्तविभागः।
कलियाचकविक्रमकिशोर–आदर्शसंस्कृतमहाविद्यालयः, हेरिया,पूर्वमेदिनीपुरम्
721430, पश्चिमवंग, भारत।

**CorrespondingAuthor:**
**डा. दयानन्दपाणिग्राही**
सहायकाचार्यः, अद्वैतवेदान्तविभागः।
कलियाचकविक्रमकिशोर–आदर्शसंस्कृतमहाविद्यालयः, हेरिया,पूर्वमेदिनीपुरम्
721430, पश्चिमवंग, भारत।

# शाङ्करमनीषापञ्चकस्य सदाशिवेन्द्रयोगितात्पर्यदीपिकायास्समीक्षणम्

**डा. दयानन्दपाणिग्राही**

## प्रस्तावना

### अद्वैतवेदान्तदर्शनं प्रकरणग्रन्थाश्च

भारतीयदर्शनेषु अद्वैतवेदान्तदर्शनस्य स्थानमत्यन्तं प्रधानं वर्तते। अस्य नामधेयं वेदान्तदर्शनमित्यपि प्रसिद्धम्। वेदानामन्तस्सिद्धान्त इति वेदान्तो वेदैर्निर्णीतोऽर्थ वेदान्तः, अथवा यस्य ज्ञानानन्तरं वेद जानाति क्रियाया अन्तो निरुपयोगो भवति स वेदान्त इति व्युत्पत्यर्था बहुविधाः श्रूयन्ते। अयमतिप्राचीनसम्प्रदायस्सर्वसिद्धान्तशिखामणिश्चास्ति। सम्पूर्णतया पारमार्थिकाद्वैतस्थापको वेदान्तः। उक्तं च सर्वततन्त्रसिद्धान्तपदार्थलेशसंग्रहे – जीवब्रह्माभेदबोधकवाक्यं वेदान्त इति, वेदानामन्तोऽवसानभागो वेदान्त इति च। [1]

एवं वेदान्तस्य प्रस्थानत्रयमङ्गीक्रियते– श्रुतिप्रस्थानं यथा उपनिषद्, स्मृतिप्रस्थानं गीतादिकं, न्यायप्रस्थानं ब्रह्मसूत्रादिकम्। तत्र उपनिषदि ऋषीणां सत्यद्रष्टृणां वा सत्योपलब्ध्यादिकं विधृतं, गीतादौ ऋषिभिः विधृतमुपलब्ध्यादिकं भाषान्तरेणोपस्थापितम्। ब्रह्मसूत्रादौ तु श्रुतिस्मृतिवचनादिकं युक्तिसहायेन दृढीकृतम्।[2] एवमद्वैतवेदान्तदर्शनधारा प्रस्थानत्रयभाष्यमाश्रित्य प्रवहन्त्यस्ति। तत्र भाष्यकाराणामनन्तरं तच्छिष्यपरम्परायामद्यावध्यपि प्रचलतीयं परम्परा। किन्तु कालक्रमानुसारं भाष्याणामवबोधाय सम्प्रदायाचार्याः मन्दमतिबालानामितरजनसामान्यानामुपकाराय सरलसुललितबोधगम्यया गीर्वाणगिरा श्लोकान् विरचय्य यथात्मैक्यमुपदिदिशुः। त एव ग्रन्थाः प्रकरणग्रन्थनाम्ना प्रसिद्धा बभूवुः। वस्तुतः प्रकरणग्रन्थस्तादृशोऽस्ति यत्र शास्त्रस्यैकदेशं स्वीकृत्य सम्पूर्णशास्त्रज्ञानमुदिश्यते साररूपेण। उक्तञ्च बृद्धैः–

> शास्त्रैकदेशसम्बद्धं शास्त्रं कार्यान्तरे स्थितम्।
> आहुः प्रकरणं नाम ग्रन्थभेदं विपश्चितः।। [3]

### भगवान् श्रीशङ्कराचार्यः, तत्कृतं मनीषापञ्चकं तद्वैशिष्ट्यञ्च

भगवता शङ्करेण जीवब्रह्मणोरैक्यं श्रुतिस्मृतिनिर्घोषं महता कण्ठेन अखण्डभारते सर्वत्र न केवलमुद्घोषितं तेनोपस्थापितं , प्रचारितं, प्रसारितञ्चापि। परमकरुणावतारभूता आचार्याः श्रीमच्छङ्करभगवत्पादाः लोकानुद्दिधीर्षवः तत्तज्जनानुकूलयोग्यतापुरस्सरं शास्त्राणि विरचयामासुः। तत्र शास्त्रकुशलानुद्दिश्य प्रस्थानत्रयभाष्यं व्यलेखिषुः।

समान्यजनानां हृदयतलेष्वद्वैतत्त्वस्य सञ्चालनाय आचार्यैः प्रकरणग्रन्थानां रचना विहिता। ब्रह्मज्ञानादेव मुक्तिः नान्यथेति मन्वाना आचार्या ब्रह्मतत्त्वमेव सरलया सुगमया च भाषया प्रकरणग्रन्थेषू प्रत्यपादयन्। तत्र प्रमुखग्रन्थाः यथा – विवेकचूडामणिः, उपदेशसाहस्री, अपरोक्षानुभूतिः, वाक्यवृत्तिः, स्वात्मनिरूपणम्, आत्मबोधः, शतश्लोकी, पञ्चीकरणप्रकरणस्वरूपनिरूपणं,त्रिपुरी, सर्ववेदान्तसिद्धान्तसंग्रहः, एकश्लोकी, दशश्लोकी, मनीषापञ्चकं, साधनपञ्चकम्, उपदेशपञ्चकम्,अद्वैतपञ्चरत्नं, मोहर्मुरं, चर्पटपञ्जरिका इत्यादि बहवो ग्रन्थाः।

अद्वैतवेदान्तप्रतिष्ठापकस्याचार्यशङ्करस्य कृतिषु भाष्यप्रकरणस्तोत्रादिग्रन्थेषु किञ्चिद्वैशिष्ट्यं समादधातीयं कृतिः मनीषापञ्चकमिति। साधनपञ्चकं, मायापञ्चकं, मातृपञ्चकं, काशीपञ्चकं, गणेशपञ्चरत्नम्, शिवपञ्चरत्नम्, इव इदमेकं तेषां कृतित्वेन पञ्चकमुपलभ्यते। व्यास–शुक–पराशर–गौड़पादाचार्याणां मार्गमनुसरद्भिः आचार्यैः श्रीमच्छङ्करभगवत्पादैः तत्र तत्र स्तोत्रसाहित्येषु अपि यावच्छक्यम् अद्वैततत्त्वमुपनिबद्धम्। तेषु मनीषापञ्चकमित्यपि प्रकरणग्रन्थेषु स्वीयमहत्त्वं तथा जीवपरमात्मनोरैक्यावगमाय सुप्रसिद्धञ्चास्तीति प्रतिपादयति। पञ्चभिः श्लोकैरुपनिबद्धमिदं मनीषापञ्चकमिति।[4]

**मनीषापञ्चकस्य व्याख्याः टीकाग्रन्थाश्च**

प्रमुखेषु प्रकरणग्रन्थेष्वेतेषु मनीषापञ्चकम् इति विशिष्टमस्ति। श्रीमद्भगवत्पादशङ्करविरचित अद्वैतसिद्धान्तसारभूतोऽयं प्रकरणग्रन्थः कगञ्चिद्वैशिष्ट्यमावहति अद्वैतसाम्रज्ये। यतो हि लघुभूतस्यापि पञ्चकस्य नैका व्याख्यास्समुपलभ्यन्ते। महामहोपाध्याय–न्याय–व्याकरण–वेदान्तशास्त्रविचक्षण–पण्डितश्री आर्. तङ्गस्वामिशर्मविरचिते [5] अद्वैतवेदान्तसाहित्येतिहासकोश ग्रन्थे अस्य मनीषापञ्चकस्योपरि विरचितव्याख्यासूच्युपलभ्यते। तद्यथा –

| | |
|---|---|
| मनीषापञ्चके तात्पर्यदीपिका – | सदाशिवयोगी |
| मनीषापञ्चकव्याख्या – | सदाशिवशिष्यः |
| मनीषापञ्चकव्याख्या – | शिवयोगीन्द्रशिष्यः |
| मधुमञ्जरी टीका – | बालगोपालयतिः |
| मनीषापञ्चकव्याख्या मधुमञ्जरी – | नृसिम्हाश्रमी |
| व्याख्या पञ्चरत्नवृत्तिः – | वासुदेवेन्द्रः |
| मनीषापञ्चकव्याख्या – | विमलबुधाकरः |

**मनीषापञ्चकस्य तात्पर्यदीपिकाकर्तृपरिचयः**

योगशक्तिसम्पन्नस्य महतस्सिद्धस्यास्य सदाशिवब्रह्मेन्द्रस्य पूर्वाश्रमे शिवरामकृष्ण इति नाम आसीत्। अयं मधुरानगरवासिनोस्सोमनाथावधानिनः पार्वत्याश्च पुत्रः। प्रसिद्धरामभद्रदीक्षितसतीर्थ्योऽयम् आश्रमस्वीकारादनन्तरं सदाशिवेन्द्र इति प्रसिद्धिं गतः। दहरविद्याप्रकाशिकाकर्तुः परमशिवेन्द्रस्य शिष्यः अद्वैतरसमञ्जरीकर्त्तुर्नल्लादीक्षितस्य गुरुः, तिरुविअनल्लू अय्यावलिति प्रसिद्धस्य श्रीधरवेङ्कटशास्त्रिणः, गोपालकृष्णशास्त्रिणश्च सतीर्थ्यः, शरभोजिप्रथमस्य सामयिकः अष्टादशशतकीय इति निर्णीयते।अखण्डकावेरीतीरस्थिते त्रिशिरपुर्यन्तर्गते नेरुरग्रामे अयं समाधिनिष्ठश्च। सदाशिवब्रह्मेन्द्रोऽयं नवसालपुरराजाय विजयरघुनाथतोण्डमानाख्याय मन्त्रानुपदिदेश। तत आरभ्य प्रतिनवरात्रं पण्डितपरिषत्प्रचलति इति च वदन्ति। अस्य कालः कृष्णमाचार्यकृत संस्कृतसाहित्येतिहासे तु षोडशशतकीय इति दृश्यते। अस्य कृतिषु आत्मविलासः,आत्मानात्मविवेकप्रकाशिका, आत्मानुसन्धानम्, कैवल्योपनिषद्दीपिका, नवमणिमाला, मनीषापञ्चकव्याख्या तात्पर्यदीपिका, ब्रह्मतत्त्वप्रकाशिका, वेदान्तसिद्धान्तकल्पवल्ली सव्याख्या, स्वानुभूतिप्रकाशः, गीतरत्नमालिका, गुरुरत्नमालिका, शिवमानसिकपूजा, सपर्यायस्तवः, शिवयोगदीपिका, योगसुधाकरः, दक्षिणामूर्तिध्यानम्, महावाक्यार्थशोधनम्, परमहंसचर्या, स्वप्नोदितम्, सर्ववेदान्तसंग्रहश्चेति ग्रन्थाः विद्यन्ते। [6]

**मनीषापञ्चकस्य तात्पर्यदीपिकायाः पर्यालोचनम्।**

सर्वादौ तात्पर्यदीपिकाकारः व्याख्यानात्पूर्वमास्तिकपरम्परामनुसृत्य श्रीमद्भगवत्पादविरचितस्य मनीषापञ्चकस्य व्याख्यां चिकीर्षुश्चिकीर्षितार्थाविघ्नपरिसमाप्तिसम्प्रदायाविच्छेदलक्षणफलसाधनात् आशीर्नमस्क्रिया वस्तुनिर्देशो वापि तन्मुखम् इत्यादिनमस्कारात्मकस्य मङ्गलाचरणस्योल्लेखं करोति। यतो हि अभिवादनशीलस्येत्यादिभिः नमस्कारस्य माहात्म्यं सततं शास्त्रेषु प्रकटितम्। अतः नमस्कारपूर्वकं मङ्गलमालिखति।[7] तत्र व्याख्याता सर्वादौ स्वप्रकाशात्मकं नित्यसुद्धबुद्धमुक्तस्वभावमानन्दघनमद्वन्द्वं निर्विकारं निरञ्जनमात्रं परमात्मानं नमस्कृत्य सच्चिदानन्दं श्रीगुरुं करुणानिधिमित्यादिना गुरोः संस्मरणपूर्वकं प्रणतिततीः विज्ञापयति। ततः मनीषापञ्चकस्य व्याख्यामरभते। ततः मनीषापञ्चकस्य व्याख्याभूमिकां प्रपञ्चयति। तद्यथा–

इह खलु परमकारुणिको भगवान् शिवः अनर्थमकरागारे संसारसागरे निमग्नं लोकमुद्दिधीर्षुः कदाचित् काशी प्रति गच्छन्तं आचार्य प्रति चण्डालवेषं धृत्त्वाजगाम। ततो जगाद भगवानाचार्यः–हे चण्डालाधम ! इतो दूरं गच्छ गच्छेति। ततश्चण्डालवेषमण्डितः शिवः प्राह–

अन्नमयादन्नमयमथवा चैतन्यमेव चैतन्यात्।
यतिवर ! दूरीकर्तुं वाञ्छसि किं ब्रूहि गच्छ गच्छेति।।[8]

अस्यार्थ टीकाकर्ता श्रीसदाशिवेन्द्रसरस्वती स्पष्टयत्येवं– हे यतिवर ! अत्र ब्रूहि किमन्नमयाच्छरीरादन्नमयं शरीरं गच्छ गच्छेति दूरीकर्तुं वाच्छसि ? अथवा चैतन्यादेव चैतन्यं गच्छ गच्छेति दूरीकर्तुं दूरीकर्तुं वाञ्छसि। न तावदाद्यः। उभयोरीरयोरन्नकार्यत्वेनैकत्त्वात्। श्रूयते हि शरीरस्य अन्नकार्यत्वम्। श्स वा एष पुरुषोऽन्नरसमय इति। एवं सर्वस्यापि जगतो मायाकार्यत्वेनैकत्वं द्रष्टव्यम्। न द्वितीयः। चैतन्यस्य सर्वत्रैकरूपत्त्वात्। एको देवः सर्वभूतेषु गूढस्सर्वव्यापी सर्वभूतान्तरात्मेश्ति श्रुतेः। न ह्येकस्य सर्वगतस्य चैतन्यस्य देशाद्देशान्तरं प्रत्यपसरणं सम्भवति। [9]

अत्र व्याख्यात्वृव्याख्याशैलीं दृष्ट्वा ज्ञातुं शक्यते यत् श्रीमद्भगवत्पादानां स्पष्टमाभिमुख्यं प्रकटयितुं व्याख्यात्रा भृशं प्रयत्नो विहितः। तच्च प्रदर्शनाय श्रुतिप्रमाणमुपन्यस्य श्लोकस्य सार्थकत्वं प्रतिपादितञ्च। यथा श्लोके अन्नमयादन्नमयम् इति पंक्तेः स वा एष पुरुषोऽन्नरसमयः इति श्रुत्या प्रदर्शनं तथा चैतन्याच्चैतन्यम् इत्यत्र एको देव सर्वभूतेषु गूढः इत्यस्य श्रुतिवाक्यस्य च निदर्शनमभिहितम्। वस्तुतः टीकाकारेणात्र जीवब्रह्मणोरैक्यप्रदर्शनाय तथा मनीषापञ्चकस्थविशेषार्थं प्रकटनाय श्रुतिसारगर्भितार्थमाविष्करणाय च सर्वमेतदुल्लिखितमिति प्रतिभाति।

अद्वैतवेदान्तस्योद्घोषमेतदेव यत् – ब्रह्म सत्यं जगन्मिथ्या जीवो ब्रह्मैव नापर इति। एतेनैव सर्वे अद्वैतिनः श्रुतिमनुसृत्य भगवत्पादशङ्करस्योक्तीः समर्थयन्ति। स्वयं च शङ्करभगवत्पादाः सर्वत्र प्रस्थानत्रये एतदेव प्रतिपादयन्ति। उत्तममध्यमाधमाधिकारिभेदादुपदेशा अपि भिद्यन्ते। उत्तमाधिकारिणां साक्षाच्छ्रुतिबोधो निर्णीयते। मध्यमाधिकारिणां गीतोपदेशो विधीयते तथाधमाधिकारिणां कृते स्तोत्रप्रकरणादिग्रन्थाः भगवत्पादैः ग्रथितास्सन्ति। तत्तद्ग्रन्थेषु मनीषापञ्चकमिति किञ्चिद्विशिष्टमस्ति। यतो हि कथानुसारं भगवतः श्रीशङ्करस्याद्वैतबोधसमनन्तरमेते श्लोकाः प्रादुर्भूताः। तस्माच्छङ्करबोधानुरूपं मनीषापञ्चकमिदम्। अस्य पातनिकायामेतत्प्राप्यते – प्रत्यग्वस्तूनीति।

सर्वस्यापि मायामयत्वेन चैतन्यत्वेन वा एकात्मकत्वात् परनिन्दादिकं न युक्तमिति भावं तथा चैतन्यैकत्वं स्पष्टीकर्तुं मनीषापञ्चकस्थपातनिकामाह –

प्रत्यग्वस्तुनि निस्तरङ्गसहजानन्दावबोधाम्बुधौ
विप्रोऽयं श्वपचोऽयमित्यपि महान् कौऽयं विभेदग्रहः।
किं गङ्गाम्बुनि बिम्बितेऽम्बरमणौ चण्डालवीथीपयः
पुरेवान्तरमस्ति काञ्चनघटीमृत्कुम्भयोर्वाम्बरे।। [10]

अत्र तात्पर्यदीपिकाटीकायां श्रीमता सदाशिवेन्द्रयोगिना श्लोकानामद्वितीये ब्रह्मणि एव तात्पर्यं सर्वत्रेति प्रत्यपादि।वस्तुतः द्वितीयाद्वै भयं भवति[11] इति श्रुत्या सर्वत्र द्वैतभाव निराक्रियतेऽद्वैतवेदान्ते। द्वैतदर्शनस्य निन्दापि श्रुत्या क्रियते। किन्त्वत्र श्रीशङ्करसदृशब्रह्मज्ञानी साक्षादध्यासधर्मावृतस्सन् चण्डालमिति मत्वा यं दूरीकर्तुं वाञ्छति तत्तु भेदबुद्ध्या। भेदबुद्धिस्त्वत्र अविद्यावद्विषयशास्त्रज्ञानेन। शास्त्रं हि कथयति –

शूद्राज्जातस्तु चण्डालः सर्वधर्मबहिष्कृतः।[12] इति।

अतः वर्णाश्रमाचारधर्मान्नाश्रित्य ब्रह्मणशूद्रादिभेदान् चोपदिश्यते। सर्वमेतत्तु अविद्याशास्त्रोपदिष्टव्यवहारो हि। अतः जगदुद्दिधीर्षया भगवान् श्रीशङ्कराचार्यस्य परीक्षां नयति अन्नमयादन्नमयमित्यादिषु। टीकाकारश्चास्मिन् विषये – उत्तमाधनभावेन महानयं विभेदग्रहः कः (न) कोऽपीत्यर्थः। श्एकमेवाद्वितीयश मिति स्वगतसजातीयविजातीयभेदराहित्यश्रवणात् मृत्योस्स मृत्युमाप्नोति य इह नानेव पश्यति।[13]

यदा ह्येवैष एतरस्मिन्नुदरसन्तरं कुरुते। अथ तस्य भयं भवति इत्यादिभेददर्शननिन्दाश्रवणाच्च। अतस्सर्वत्राखण्डैकरसे ब्रह्मणि न मनागपि भेदावकाशः। [14]इति विशदयति।

स्पष्टीकरोति चैतद्दृष्टान्तस्य व्याख्याप्रदर्शनपूर्वकं यथा – यथा गङ्गाम्बुनि भागीरथीपाथसि प्रतिबिम्बिते चण्डालवीथीपयःपुरे नीचवाटिकोदकप्रवाहे वा प्रतिबिम्बितेऽम्बरमणौ सूर्ये किमन्तरमस्ति। अन्तरं भेदो नास्तीत्यर्थः। [15]
भेदस्त्वत्र उपधिकारणात्। उपाधिवशाद्धि भेदप्रतीतिः। श्रुतिश्चात्र प्रसिद्धास्ति। तथा हि–

यथा ह्ययंज्योतिरात्मा विवस्वानपो भिन्ना बहुधैको नु गच्छन्।
उपाधिना क्रियते भेदरूपो देवः क्षेत्रेष्वेवमजोऽयमात्मा।। इति। [16]
एक एव हि भूतात्मा भूते भूते व्यवस्थितः।
एकधा बहुधा चैव दृश्यते जलचन्द्रवत्।। [17] इति च।

अतः परमात्मनः सूर्यकादिवदपारमार्थिक एव भेदः। किञ्च यथा परमार्थतः परिपूर्ण एकोऽप्यकाशः रुक्मघटमृद्घटयोरवच्छिन्नतया नानेव परिच्छिन्न इवोपलक्ष्यते। न हि तस्मिन् वास्तवभेदः परिच्छिन्नभावो वास्ति। एवं परमात्मा परमार्थतोऽपरिच्छिन्न एकोऽपि देहाद्यवच्छिन्नत्वेन नानेव परिच्छन्न इवानुभूयमानोऽपि सर्वदा परिपूर्ण एवावशिष्यते। तथा च श्रूयते–

घटसंवृतमाकाशं नीयमाने घटे यथा।
घटो नीयेत नाकाशं तद्वज्जीवो नभोपमः।। [18]

एवं परमात्मनः आकाशवन्नित्यत्वं प्रदर्शयन् समदर्शिस्थितिमाह टीकाकारः–

चण्डालदेहे पश्वादिशरीरे ब्रह्मविग्रहे।
अन्येषु तारतम्येन स्थितेषु पुरुषोत्तमः।।
व्योमवत् सर्वदा व्याप्तः सर्वसम्बन्धवर्जितः।
एकरूपो महादेवस्स्थितः सोऽहं परामृतः।। इति।[19]

एतेनैव भगवतः श्रीशङ्कराचार्यस्य बोधो जातः। तात्पर्यदीपिकाकारास्तु – ईश्वरवाक्यं निशम्य सर्वज्ञो भगवानाचार्यः सकलसाधनकलापैस्सह श्रुताध्यात्मशास्त्रान् विगलितनिरन्तरनिरतिशय– निजानन्दानुसन्धानतया अनुपशान्तस्वन्तान् अत एवाविगलिताभिमानवतः कांश्चित् पुरुषविशेषान् उपलक्ष्य तेषां विनैव समाधिना ब्रह्मणत्वाद्यभिमानापनुत्तये स्वपदे विश्रान्तये च पञ्चभिः श्लोकैः स्वानुभूतिमाविष्करोति। [20]
पञ्चश्लोकेष्वत्र आचार्य सदाशिवेन्द्रयोगी कतिपयविषयान् गृहीत्वा तदनुसारं प्रपञ्चयति। यथा मनीषापञ्चके प्रथमपुष्पं–

जाग्रत्स्वप्नसुषुप्तिषु स्फुटतरा या विदुज्जृम्भते
या ब्रह्मादिपिपीलिकान्ततनुषु प्रोता जगत्साक्षिणी।
सैवाहं न च दृश्यवस्त्विति दृढप्रज्ञाऽपि यस्यास्ति चेत्
चण्डालोऽस्तु स तु द्विजोऽस्तु गुरुरित्येषा मनीषा मम।। १।।

प्रथमश्लोके –जाग्रत्स्वप्न इत्यादिना पञ्चदशीकारोक्त – नोदेति नास्तमेत्येका संविदेषा स्वयं प्रभा [21] इति भावं प्रकटयति। अत्र परमात्मनः स्वप्रकाशत्वं तथा साक्षिस्वरूपं निरूपयति। यथा – योऽयमवस्थात्रयावभासकत्त्वेन अनुवर्तमानः आविर्भावतिरोभावधर्मरहितः स्वप्रकाशचिदेकरसः परमात्मा स एवाहमस्मीत्युत्तरेणान्वयः। एवं अवस्थात्रयावभासकत्त्वेन प्रतीचः परब्रह्मतां प्रदर्श्य व्यष्टिसमष्ट्यात्मकसकलशरीराधिष्ठानत्वेन तदवभासकतया प्रत्यगात्मनः परब्रह्मत्वं दर्शयति। या ब्रह्मादिपिपीलिकान्ततनुषु प्रोता आत्मभावेन अवभासकतयाऽवस्थिता या संवित् यो विज्ञानैकरसः परमात्मा।
अपि च जगत्साक्षिणि इत्यनेन साक्षिस्वरूपं प्रदर्शयति। तथा हि – न केवलमयमात्मा देहादिचेतनप्रपञ्चस्याव–भासकः अपि तु जगतः प्रपञ्चस्यापीत्याह–जगत्साक्षिणीति। साक्षादीक्षत इति साक्षी सर्वस्य जगतः द्रष्टा परमात्मा। सर्वेषु शरीरेष्वात्मत्वेनावस्थितिः सर्वस्य जडप्रपञ्चस्य अवभासकः चिन्मात्ररूपः साक्षी यः परमात्मा स एवाहमस्मि न च दृश्यवस्तु देहादिकं नास्मि। तस्य स्वरूपयाथात्म्यज्ञानेन बाध्यमानत्त्वात्। एवं यस्य दृढप्रज्ञाऽस्ति।अर्थात् – यथा बहुजन्मसु दृढं भावितत्त्वेन अस्मिन् जन्मनि विनैव परोपदेशं कामादय उत्पद्यन्ते। तथा दीर्घकालनैरन्तर्यसत्कारैर्भाविते तत्त्वे पश्चाद्वाक्ययुक्तिपरमर्शमन्तरेणैव परोवर्तिघटादिवत् सहसा तत्त्वं परिस्फुरति चेत्तदिदं प्रज्ञानस्य दाढर्यं नाम। एतादृश तत्त्वज्ञानं यस्यास्ति स तु ब्रह्मैवेति कृत्वा चण्डालो वास्तु द्विजो वास्तु गुरुरिति मम मनीषा।[22]
अत्र चण्डालस्यापि गुरुत्वे टीकाकारः प्रमाणमवतारयति – नित्यशुद्धासङ्गात्मविज्ञानेन जातिकुलाद्यभिमाननिवृत्तः सोऽन्त्यजोऽपि शुद्ध एव। अतः ब्रह्मात्मैक्ये न किञ्चित् बाधकमिति भावः। तथा च स्मर्यते –

न कुलं वृत्तहीनस्य प्रमाणमिति मे मतिः।
अन्त्येष्वपि च जातानां वृत्तमेव विशिष्यते।।[23] इति।

द्वितीयपुष्पं भवति –

ब्रह्मैवाहमिदं जगच्च सकलं चिन्मात्रविस्तारितं
सर्वं चैतदविद्यया त्रिगुणया सेशं मया कल्पितम्।
इत्थं यस्य दृढा मतिस्सुखतरे नित्ये परे निर्मले
चण्डालोऽस्तु स तु द्विजोऽस्तु गुरुरित्येषा मनीषा मम।।२।।

श्लोकेऽस्मिन् अहं ब्रह्मास्मि इति भावो द्योतितोऽस्ति। जीवो ब्रह्मैव नापर इति अद्वैतवेदान्तसिद्धान्तः। जीव एव ब्रह्म, न तत्तस्माद्भिन्नः। अतः यदा जीवस्य अविद्यानिवृत्तौ ज्ञानमुदेति तदा सर्वं जगदिदं मिथ्या प्रतिभाति, जीवश्च ब्रह्म वेद ब्रह्मैव भवति। तस्य च ब्रह्मणः स्वरूपतटस्थलक्षणभेदेन लक्षणं द्विविधं भवति। स्वरूपमेव लक्षणं स्वरूपलक्षणं , तद्यथा सच्चिदानन्दं ब्रह्मेति। एतदेव द्वितीयश्लोके प्रतिपाद्यते ब्रह्मैवाहमित्यादिना टीकाकारेण। तद्यथा – चिन्मात्रविस्तारितत्त्वात् चिन्मात्रे ब्रह्मण्यध्यस्तत्वादिदं सर्वं जगच्चिन्मात्रं ब्रह्मैवेत्यर्थः। त्रिगुणया अविद्यया साधनेन मया प्रत्यगात्मना द्रष्ट्रा एतत् सर्वं दृश्यजातं सेश्वरं जगत् कल्पितं यतः अतः जगदधिष्ठानभूतं चिन्मात्रं ब्रह्मैवाहमस्मि। इत्थमनेन प्रकारेण सुखतरे निरतिशयानन्दैकरसे नित्ये ध्रुवे , अत एव परे सर्वोत्कृष्टे, अत एव च निर्मले अज्ञानतत्कार्यमलरहिते स्वप्रकाशचिदेकरसे ब्रह्मणि यस्य मुमुक्षोर्मतिर्दृढा भवति निरतिशयानन्दनित्यशुद्धस्वप्रकाश– चिदेकरसब्रह्मविषयकसाक्षात्कारो दृढो भवति स तु नित्यशुद्धब्रह्मैवेति कृत्वा चण्डालो वा भवतु द्विजो वा भवतु गुरुरिति मम मनोषेत्यन्वयः। अतः प्रत्यग्ब्रह्मणोरैक्यं सुघटत इति भावः। [24]
तृतीयपुष्पं यथा –

शश्वन्नश्वरमेव विश्वमखिलं निश्चित्य वाचा गुरो–
र्नित्यं ब्रह्म निरन्तरं विमृशता निर्व्याजशान्तात्मना।
भूतं भावि च दुष्कृतं प्रदहता संविन्मये पावके
प्रारब्धाय समर्पितं स्ववपुरित्येषा मनीषा मम।।३।।

अत्र जगन्मिथ्यात्वं परब्रह्मणः सत्यत्वं च प्रतिपादितम्। संसारानलसन्तप्तः श्रान्तशीतलोपचारैः दाहम् उपशमयितुं समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठं गुरुमुपाश्रयेत् इति अस्ति कश्चिन्नियमः। गुरुश्च अध्यारोपापवादाभ्यां निष्प्रपञ्चं प्रपञ्चते इति न्यायेनादौ अज्ञानादिसकलडसमूहान् अवस्तुजातान् आकारयति। अनन्तरं स्थूलारुन्धती न्यायेन एकैकं स्थूलं बाधित्वा सूक्ष्मात् सूक्ष्मतरं सूक्ष्मतमं ब्रह्म गमयति। तदेवोच्यतेऽत्र गुरोः वाचाखिलं विश्वं नश्वरमेव निश्चित्य निर्व्याजशान्तात्मना मया नित्यं ब्रह्म निरन्तरं विमृशता संविन्मये पावके भूतं भावि च दुष्कृतं प्रदहता प्रारब्धाय स्ववपुः समर्पितम्, इति एषा मम मनीषा।

टीकाकारास्त्वत्र –इदं विश्वं शश्वदनुक्षणं नश्वरमेवेति निश्चित्य नित्यं कालत्रयाबाध्यं निरस्तसमस्तप्रपञ्चं स्वप्रकाशचिदेकरसं सदानन्दघनमद्वितीयं ब्रह्म यत्तदेवाहमस्मीति निरन्तरं एतत् दीर्घकालादेरप्युपलक्षणं विमृशत विधिवत् सर्वकर्माणि संन्यस्य नैरन्तर्य दीर्घकालसत्कारैः दृढमसङ्गचिद्रूपमखण्डैकरसं ब्रह्माहमिति भावयेदिति। ब्रह्मभावनाप्रकारस्तु भगवत्पादैरेव दर्शितः। यथा –

दृशिस्वरूपं गगनोपमं परं स्कृद्विभातं त्वजमेकमक्षरम्।
अलेपकं सर्वगतं यदद्वयं तदेव चाहं सततं विमुक्त ओमिति।।[25]

एतादृशी निरतिशयानन्दब्रह्मभावनायां मनसो वासना बन्धरूपा भवति। तदुच्छेदं विना न शक्यते चित्तनिरोधः, विना तेन न शक्यते ब्रह्मपदमधिगन्तुम्। उच्यते हि –

यावद्विलीनं न मनो न तावत् वासनाक्षयः।
न क्षीणा वासना यावत् चित्तं तावन्न शाम्यति।।[26] इति।

एतेन वासनाक्षये मनो निग्रहः, मनसो निग्रहे ज्ञानप्राप्तिश्च। अत उक्तं –

मन एव मनुष्याणां कारणं बन्धमोक्षयोः।
बन्धनं विषयासक्तं मुक्त्यै निर्विषयस्मृतम्।।[27]

ज्ञानादेव तु मुक्तिः। तच्च ज्ञानं यदा जायते तदा सर्वं कर्मजातं दहति। यथा गीतायां भगवद्वचनं–

यथैधांसि समिद्धोऽग्निर्भस्मसात् कुरुतेऽर्जुन।
ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुते तथा।।[28]

सर्वकर्मपदेन प्रारब्धातिरिक्तकर्मणां ग्रहणम्। यतो हि श्रुत्यनुभवयुक्तिभ्यः आरब्धफलयोः कर्मणोरविनाशोऽवगम्यत–तस्य तावदेव चिरं यावन्न विमोक्ष्येऽथ सम्पत्स्ये इति श्रुतिः।[29] अतः उक्तं टीकाकारेण– प्रारब्ध्याय समर्पितं स्ववपुरिति। प्रारब्धाय प्रारब्धफलाय सुकृताय दुष्कृताय च स्ववपुस्समर्पितं, तत्त्वविदोऽपि आदेहपातेनाभासमात्रेण संसारोऽङ्गीकर्तव्य इति फलितार्थः। येनैतादृशेन विदुषा स्ववपुः प्रारब्धाय समर्पितं यतः अतः स गुरुरिति मम मनोषेत्यनन्वयः। [30]
चतुर्थपुष्पं भवति –

या तिर्यङ्नरदेवताभिरहमित्यन्तः स्फुटा गृह्यते
यद्भासा हृदयाक्षदेहविषया भान्ति स्वतोऽचेतनाः।
तां भास्यैः पिहितार्कमण्डलनिभां स्फूर्तिं सदा भावयन्
योगी निर्वृतमानसो हि गुरुरित्येषा मनीषा मम।।४।।

अत्र आब्रह्मस्तम्भपर्यन्तं सर्वं खल्विदं ब्रह्मेति ब्रह्मसत्ता वर्ण्यते। सर्वमपि वस्तुजातं ब्रह्मणः भासा प्रकाशन्ते। टीकाकारादतु – सर्वेषामहंप्रत्यपालम्बनत्त्वेन अन्तःसर्वान्तरतया स्फुटा प्रकाशान्तरनिरपेक्षतया स्वयंप्रकाशमाना या स्फूर्तिः चिदेकरसः परमात्मा गृह्यते अनुभूयते। स्वतोऽचेतनाः हृदयाक्षदेहविषयाः यद्भासा यस्य स्वप्रकाशचिदेकरसस्यात्मनो भासा प्रकाशेन भान्ति। श्तस्या भासा सर्वमिदं विभातीशतिश्रुतेः।[31] तदुक्तम्–

अजडात्मवदाभान्ति यत्सान्निध्याज्जडा अपि।
देहेन्द्रियमनःप्राणाः सोऽहमित्यवधारय।।[32] इति।

किन्तु सर्वावभासकं परमात्मानं न जान्ति ते। तथा चोक्तम्–

तमहंप्रत्ययव्याजात् सर्वे जानन्ति जन्तवः।
तथापि शिवरूपेण न विजानन्ति मोहिताः।। [33] इति।

किन्तु शान्तोदान्तोपतस्तितिक्षु निर्वृतमानसः योगी स्वध्यानाभ्यासबलेन समर्थो भवति अधिगन्तुं तत्तत्त्वम्। उक्तञ्च टीकाकारेण –

शान्तसन्देहदौरात्म्यं गतकौतुकविभ्रमम्।
परिपूर्णतरं चेतः पूर्णेन्दुरिव राजते।।
परिप्राप्तविवेकस्य त्यक्तसंसारसंस्थितेः।
चेतसस्त्यजतो रूपमानन्दो हि विवर्द्धते।। [34] इति।

यस्मात् यो निरुद्धमनाः स्फूर्तिं भावयन्नास्ते स तस्मात् सुखितमानसः गुरुरिति मम मनीषेत्यन्वयः। इत्थं जीवब्रह्मैक्यं सुष्टु प्रतिपादितमिति भावः।
पञ्चमपुष्पे –

यत्सौख्याम्बुधिलेशलेशत इमे शक्रादयो निर्वृता
यच्चित्ते नितरां प्रशान्तकलने लब्ध्वा मुनिर्निर्वृतः।
यस्मिन्नित्यसुखाम्बुधौ गलितधीर्ब्रह्मैव न ब्रह्मवित्
यः कश्चित् स सुरेन्द्रवन्दितपदो नूनं मनीषा मम।।५।।

स्तोत्राणामन्ते काचित् फलश्रुतिः प्रायेण परिलक्ष्यते। एवं चात्र अद्वैततत्त्वनिर्णयपुरस्सरम् अद्वैतं ब्रह्म एव परमं फलं, तस्याभ्यर्हितत्वादिति प्रतिपाद्यते। देवताभिमानिनः इमे इन्द्रादयः लेशतः यत्सौख्याम्बुधिलेशं प्राप्य निर्वृताः। अर्थात् सामान्यमात्मतत्त्वचिन्तनेन एते देवाः हिरण्यगर्भलोके स्थित्वा कल्पान्ते मुक्ताः अभूवन्। मुनिः प्रशान्तकलने चित्ते यत् लब्ध्वा निर्वृतः , यस्मिन् नित्यसुखाम्बुधौ ब्रह्मविद् ब्रह्मैव भवति। तस्मिन् (नित्यसुखाम्बुधौ) यः कश्चित् गलितधीः गच्छति चेत् स नूनं सुरेन्द्रवन्दितपदः भवति इति मम मनीषा। एवं च कर्तृत्वभोक्तृत्वरहितवान् जीवः सर्वकर्मसन्न्यास–पूर्वकं यदि ब्रह्मणि लीनं भवति तर्हि सः ब्रह्मैव भवति।
टीकाकारः श्रीसदाशिवेन्द्रस्त्वेतत् कथयति – इत्थं यः कश्चित् परिपूर्णपरमानन्दपयोनिधौ प्रलीनमनस्कः स तु परिपूर्णपरमानन्दस्वरूपत्वात् तत् स्वरूपं ब्रह्मैव न ब्रह्मवित् भेदाभावात्। तथा च श्रूयते– स यो ह वै तत् परमं ब्रह्म वेद ब्रह्मैव भवतीति। स्मर्यते च–

दर्शनादर्शने हित्वा स्वयं केवलरूपतः।
यस्तिष्ठति स तु ब्रह्मन् ब्रह्म न ब्रह्मवित् स्वयम्।। [35] इति।

अपि च

निमेषार्धं न तिष्ठन्ति वृत्तिं ब्रह्ममयीं विना।
यथा तिष्ठन्ति ब्रह्माद्याः सनकाद्याः शुकादयः।। [36] इति।

इत्येतादृशस्स गुरुरिति मम मनीषेत्यन्वयः। एवं प्रकारेण तात्पर्यदीकिाया पर्यालोचनं विहितमत्र।

**उपसंहारः**

एवम्प्रकारेण उभयत्र श्रीसदाशिवयोगिकृतायां तात्पर्यदीपिकाव्याख्यायां विशेषरूपेण अद्वैतसुधातत्त्वस्यावगाहनं कर्तुं शक्यते। अद्वैतमतस्य भगवतः श्रीशङ्कराचार्यस्य यद्वाभिप्रायस्स्यात् तन्मनसि निधाय अत्यन्तं सावधानतया सुस्पष्टवाग्व्यवहारद्वारा टीकेयं विरचितेति प्रतिभाति। एतस्याः पर्यालोचनेन अद्वैतवेदान्तसुधापानविरहरसिकाः अद्वैतसुधाम्बुधौ मज्जिताः भविष्यन्तीति आशासे।

**पादटिप्पण्यः**

1. सर्वदर्शनसमन्वयः,पृष्ठा५०
2. शांकरवेदान्ते तत्त्वमीमांसा,पृष्ठा३
3. वेदान्तसारविद्वन्मनोरञ्जनीटीकायाम्,पृष्ठा.८
4. मनीषापञ्चकम्.पृष्ठा.१

5. अद्वैतवेदान्तसाहित्येतिहासकोशः,पृष्ठा. १३२
6. तत्रैव पृष्ठा.३०१–३०२
7. तात्पर्यदिपिका,पृष्ठा.३
8. तात्पर्यदिपिका,पृष्ठा.३
9. तत्रैव,पृष्ठा.१६
10. तत्रैव,पृष्ठा.४
11. बृहदारण्यकोपनिषद्, ४/३
12. याज्ञवल्क्यस्मृतिः, १/६३
13. कठोपनिषद् २.१.१०
14. तात्पर्यदिपिका,पृष्ठा.४
15. तत्रैव,पृष्ठा.४
16. तत्रैव,पृष्ठा.४
17. अमृतविन्दूपनिषद्. १२,
18. अमृतविन्दूपनिषद्. १३
19. तात्पर्यदिपिका,पृष्ठा.४
20. तत्रैव,पृष्ठा.१७
21. पञ्चदशी १.८
22. तात्पर्यदीपिका,पृष्ठा.७
23. तत्रैव,पृष्ठा.७
24. तत्रैव,पृष्ठा.८
25. तत्रैव,पृष्ठा.१०
26. तत्रैव,पृष्ठा.८
27. ब्रह्मविन्दूपनिषद्,२
28. गीता४–३७
29. छान्दोग्योपनिषद्, ६–१४–२
30. तात्पर्यदीपिका,पृष्ठा.८
31. मुण्डकोपनिषद्,२–२–१०
32. तात्पर्यदीपिका,पृष्ठा.१४
33. तत्रैव,पृष्ठा.१५
34. तत्रैव,पृष्ठा.१५
35. तत्रैव,पृष्ठा.१६
36. तत्रैव,पृष्ठा.१६

**संदर्भ**


1. श्रीशङ्कराचार्यः। मनीषापञ्चकम्,सम्पादकः स्वामी अद्वयानन्दः, एर्णाकुलम्ः चिन्मयमिशन्।
2. श्रीशङ्कराचार्यः। प्रकरणाष्टकम्। शास्त्री एस्.एस्. (सम्पादकः)। प्रयागः महेशयोगी संस्थान।
3. श्रीशङ्कराचार्यः।(सं०२०७२)।छान्दोग्योपनिषद्भाष्यम्(सानुवाद–शांकरभाष्यसहितम्)।गोरखपुरम्ः गीताप्रेस्।
4. श्रीशङ्कराचार्यः।(सं०२०६६)।श्रीमद्भगवद्गीता(सानुवाद–शांकर भाष्यसहिता)। गोरखपुरम्ः गीताप्रेस्।
5. श्रीविद्यारण्यः। पञ्चदशी।रामकृष्णटीकोपेता। वाराणसी : चौखम्बा संस्कृत प्रतिष्ठान।
6. श्रीशङ्कराचार्यः। (सं०२०६५)विवेकचूडामणिः।(हिन्दी – अनुवाद सहित)। गोरखपुरम्ः गीताप्रेस्।
7. श्रीगजाननशम्भुसाघले। (१६६६) उपनिषद्वाक्यमहाकोशः। वाराणसी : चौखम्बा संस्कृत प्रतिष्ठान।
8. श्रीशंकराचार्यः। (२००७) श्रीशाङ्करप्रकरणग्रन्थाः।संपा. भागवतएच्.आं.। वाराणसीः चौखम्बा विद्या भवन।
9. महन्त स्वामी हरप्रकाश। शाङ्कर वेदान्त इतिहास और निबन्ध। हरिद्वारः प्राचीन अवधूत मण्डल आश्रम
10. डा.शर्मा राममूर्त्ति। (१६८७) अद्वैत वेदान्त (इतिहास तथा सिद्धान्त)। दिल्ली ; ईस्टर्न बुक लिंकर्स
11. सदानन्दयतिः।(१६६३) वेदान्तसारः विद्वन्मनोरञ्जनीटीकासमन्वितः। व्याख्याकारः शुक्लः बदरीनाथः। वाराणसीः मोतीलाल बनारसीदास।
12. आर्. तङ्गस्वामी। अद्वैतवेदान्तसाहित्येतिहासकोशः।(१६८०)। मद्रास्ः मद्रासविश्वविद्यालयः,मद्रास५